श्रेष्ठे च। "त्वष्टा च द्वादशोविष्णु रजघन्योजघन्यज" इति भार०।

**अजजीविक** त्रि० अजएव क्रयविक्रयादिभ्यां पालनादिना वा जीविका जीवनोपायोऽस्य। छागक्रयविक्रयादिना जीविकावति।

**अजटा** स्त्री नास्ति जटा शिफा यस्याः। (भुंइआमला) इति प्रसिद्धे शिफारहिते वृक्षभेदे। ष्ट०। अजडाप्यत्र

**अजडा** स्त्री अजडयति स्पर्शमात्रादङ्गमहृ नार्थं चालयति अजड+णिच्-ततः अच्। (आलकुशीति) प्रसिद्धे वृक्षे-जडभिन्ने जाड्यविरोधिचाञ्चल्यशति त्रि०।

**अजथ्या** स्त्री अजानां समूहः अज+थ्यन् स्त्रीत्वात् टाप्। अजसमूहे। तद्वन्नानावर्णत्वात् स्वर्णयूथिकायाञ्च।

**अजदण्डी** स्त्री अजस्य ब्रह्मणोदण्डोऽस्याः ५ब० गौरा० ङीष्। ब्रह्मदण्डीवृक्षे ब्रह्मणो यज्ञार्थदण्डस्य तदीयकाष्ठेन करणात्तथात्वम्।

**अजदेवता** पु० ६त०। छागाधिदेवे वह्नौ "रौद्री धेनुर्विनिर्द्दिष्टा छाग आग्नेय उच्यते" इति शु० विष्णुध०।

**अजननि** स्त्री न+जन-आक्रोशे अनि। आक्रुश्यमाने जन्माभावे। "तस्याजननिरेवास्तु जननीक्लेशकारिणीति" माघः। वा ङीप् अजननीत्यप्यत्र। अर्थाभावे अव्ययी०। जनन्याअभावे अव्य०।

**अजन्मन्** पु० नास्ति जन्म यत्र। जन्मनिवृत्तौ मोक्षे "तस्मात् सयोगादधिगस्य योगमजन्मनेऽकल्पत जन्मभीरु" रिति रघुः। ६त०। जन्मरहिते त्रि०।

**अजन्य** स्त्री लौकिकहेतुभिर्न जन्यते जन-णिच्-यत् न०त०। शुभाशुभसूचके दैवकृते भूकम्पादावुत्पाते। जन्यभिन्ने त्रि०।

**अजप** पु० असत् जपति निन्दार्थे नञ्, जप-अच्। कुपाठके अजं पाति रक्षति पा-क ६त०। छागपालके त्रि०।

**अजपति** पु० ६त०। छागश्रेष्ठे, मेषराशिपतौ मङ्गले च।

**अजपथ** पु० अजस्य तच्चरणयोग्यः पन्थाः अजेन ब्रह्मणा निर्मितः पन्था वा अप्समा०। छागचरणयोग्यपथे गगनस्थे पथाकारे सेतौ च (यमनाला) छायापथे।

**अजपथ्य** त्रि० अजपथ इव देवपथा० इवार्थे यत्। सङ्कीर्णपथे नगनसेतुतुल्ये च। [रुद्रभेदे।

**अजपद** पु०अजस्येव पदं चरणोऽस्य। अजैकपान्नामके

**अजपा** स्त्री प्रयत्नेन न जप्या अप्रयत्नोच्चारितत्वात् जप-कर्म्मणि अच्। श्वासप्रश्वासयोः वहिर्गमनागमनाभ्याम् अक्षरनिष्पादनरूपे जपे, स च हंसः, सोऽहमित्याकारश्चैव, तदाकारमन्त्रे च। "उच्छ्वासैरेव निश्वासैर्हंस इत्यक्षरद्वयम् तस्मात् प्राणस्तु हंसाख्य आत्माकारेण संस्थितः। नाभेरुच्छ्वासनिश्वासात् हृदयाग्रे व्यवस्थितः। षष्टिश्वासैर्भवेत् प्राणः षट् प्राणा नाडिका मता। षष्टिनाड्यास्त्वहोरात्रम् जपसंख्याक्रमोमतः। एकविंशतिसाहस्रं षट्शताधिकमीश्वरि!। जपति प्रत्यहं प्राणी सान्द्रानन्दमयीं पराम्। विना जपेन देवेशि! जपो भवति मन्त्रिणः। अजपेयं ततः प्रोक्ता भवपाशनिकृन्तनीति" तन्त्रम्।

**अजपाद** पु० अजस्य पाद इव पादोऽस्य हस्त्या० न अन्त्यालोपः। रुद्रभेदे तद्देवताकत्वात् पूर्व्वभाद्रपदनक्षत्रे च। पाच्छब्देन तु समासे अजपादपि उक्तार्थे पु०।

**अजपाल** त्रि० अजान् छागान् पालयति पा+णिच्-अण् ६त०। छागपालके।

**अजबन्धु** पु०अजस्य बन्धुरिव मूर्खत्वात्। अजतुल्यमन्दबुद्धौ। "सिलाची नाम कानीना अजबन्धुः पिता तवेति"।

**अजभक्ष** पु० अजैर्भक्ष्यतेऽसौ भक्ष-कर्म्मणि घञ् ६त०। (वावुइ इति) प्रसिद्धे वर्वरीवृक्षे तत्पत्रं हि अजैरतिप्रीतितो भक्ष्यते।

**अजमार** पु०अजं मारयति विक्रयार्थं मृ-णिच्-अण् उप०। (कशाइ) इति अजमांसविक्रयोपजीवे, तत्प्रधानदेशे च। भवादौ कुर्व्वा० ण्य। आजमार्य्यस्तद्भवादौ त्रि०।

**अजमीढ** पु० अजोमीढः यज्ञे सिक्तः यत्र ब०। (आजमीर) प्रसिद्धे देशे। राजनि अण्। आजमीढः तद्देशाधिपे प्रसिद्धतया युधिष्ठिरे।

**अजमुख** पु० अजस्य मेषस्य मुखमेव मुखत्वेन कल्पितमस्य। दक्षे प्रजापतौ, तस्य हि शिवद्वेषे मुखेन शिवनिन्दाकरणात् दक्षयज्ञे शिवाज्ञया वीरभद्रेण तस्योत्पाटने कृते पश्चात् शिवप्रसादने पुनस्तदुत्पादनाय वीरभद्रे नियोजिते अजमुखेनैव तन्मुखं कल्पितं तच्च काशीखण्डे विवृतं यथा। "वीरभद्रोऽपि तत् सर्व्वं सर्व्वाज्ञां प्रतिपद्य च। विना दक्षस्य वदनं यथापूर्व्वमकल्पयत्। ईश्वरं ये हि निन्दन्ति ते मूकाः पशवो ध्रुवम् ततो मेषमुखं दक्षं वीरभद्रोऽव्यकल्पयदिति"।

**अजमोदा** स्त्री अजस्य मोद इव मोदो गन्धो यस्याः अजं मोदयति आनन्दयति मोदि-अण् वा। अजगन्धवल्यां, वनयमान्याम् यमानीमाते च।

**अजम्भ** पु० नास्ति जम्भो दन्तोऽस्य ब०। भेके सूर्य्ये च। दन्तशून्ये त्रि०। अजातदन्ते अवस्थाभेदे च।